## अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च। (११६/३६१९)

[1]अव्यात् अवद्यात् अवक्रमुः अव्रत अयम् अवन्तु अवस्यु इत्येतेषु वकारयकारपरेऽव्यति परतः अन्तःपादम् एङ् प्रकृत्या भवति। 'अग्निः प्रथमो वसुभिर्नो अव्यात्' (तै.सं. २.१.११.२)। 'मित्रमहो अवद्यात्' (ऋ. ४.४.१५)। 'मा शिवासो [2]अवक्रमुः' (ऋ. ७.३२.२७)। ते नो अव्रताः। [3]शतधारो अयं मणिः। 'ते नो अवन्तु पितरः' (ऋ. १०.१५.१)। '[4]कुशिकासो अवस्यवः' (ऋ. ३.४२.९)॥

## यजुष्युरः। (११७/३६२०)

उरःशब्दः एङन्तः यजुषि विषये [5]अति प्रकृत्या भवति। 'उरो अन्तरिक्षम्' (वा. सं. ४.७)। अपरे 'यजुष्युरो' इति सूत्रं पठन्ति, उकारान्तमुरुशब्दं सम्बुद्ध्यन्तमधीयते, ते इदमुदाहरन्ति उरो अन्तरिक्षं [6]सजूः इति। यजुषि पादानामभावात् अनन्तःपादार्थं [7]वचनम्॥

## आपोजुषाणोवृष्णोवर्षिष्ठेऽम्बेऽम्बालेऽम्बिकेपूर्वे। (११८/३६२१)

[8]यजुषि इत्येव। आपो जुषाणो वृष्णो वर्षिष्ठे इत्येते [9]शब्दाः अम्बे अम्बाले इत्येतौ च यावम्बिके शब्दात् [10]पूर्वौ यजुषि पठितौ ते अति [11]परतः प्रकृत्या भवन्ति। 'आपो अस्मान् मातरः [12]शुन्धयन्तु' (वा. सं. ४.२)। 'जुषाणो अप्तुराज्यस्य' (वा.सं. ५.३५)। 'वृष्णो अंशुभ्यां [13]गभस्तिपूतः' (वा.सं. ७.१)। 'वर्षिष्ठे अधि नाके' (तै.सं. १.१.८.१)। 'अम्बे अम्बाल्यम्बिके' (तै.सं. ७.४.१९.१) यजुषीदमीदृशमेव पठ्यते। अस्मादेव निपातनात् 'अम्बार्थनद्योर्ह्रस्वः' (७.६.१०७/२६७) इति ह्रस्वत्वं न भवति॥

## अङ्ग इत्यादौ च। (११९/३६२२)

अङ्गशब्दे य एङ्[14] तदादौ चाकारे यः [15]पूर्वः स यजुषि विषये अति प्रकृत्या भवति। ऐन्द्रः प्राणो अङ्गे अङ्गे [16]अदीध्यत्[17]। 'ऐन्द्रः प्राणो अङ्गे अङ्गे निदीध्यत्' (वा. सं. ६. २०)। ऐन्द्रः प्राणो अङ्गे अङ्गे अरोचिषम्॥

## अनुदात्ते च कुधपरे। (१२०/३६२३)

[18]यजुषि इत्येव। अनुदात्ते च अति[19] कवर्गधकारपरे परतो[20] यजुषि विषये एङ् प्रकृत्या भवति। 'अयं सो अग्निः' (वा.सं. ५.३७)। अयं सो अध्वरः। अनुदात्ते इति किम्? अधोग्रे[21]। अग्रशब्द आद्युदात्तो निपात्यते। कुधपरे इति किम्? 'सोऽयमग्निः [22]सहस्रियः' (वा. सं. १५.५२)॥

---

1. अव्यादादिषु फ. 2. अवचक्रमुः क, ससृवांसो अवक्रमुः ह. 3. शतधानोऽयं मालः क. 4. कुश–कामः क. 5. अति नास्ति फ. 6. यजूः क, उरोरन्तरिक्षात् वा.सं. 7. आरम्भः फ. 8. वाक्यमिदं नास्ति फ. 9. शब्दाः नास्ति फ. 10. पूर्वेण ब. 11. परतः नास्ति फ. 12. शुन्धन्तु फ. 13. गभस्तिभिः मुद्रित पाठः। 14. शब्दः इत्यधिकम् फ. 15. एङ्पूर्वः फ. 16. अदीव्यत् क. ह. 17. अरोचि वा इत्यधिकम् क. 18. वाक्यमिदं नास्ति ग. 19. परतः इत्यधिकम् फ. 20. च इत्यधिकम् ब.क. 21. ऋद्धेन्द्रोऽग्रे इत्यधिकम् फ. 22. सह–स्रियः नास्ति क. ग.